King Duṣyanta's arrival at Kaṇva's hermitage.

ततः प्रविशति मृगानुसारी सशरचापहस्तो राजा रथेन सूतश्च ।

सूतः— (राजानं मृगं चावलोक्य) आयुष्मन्,

कृष्णसारे ददच्चक्षुस्त्वयि चाधिज्यकार्मुके ।
मृगानुसारिणं साक्षात् पश्यामीव पिनाकिनम् ॥ १

राजा— सूत, दूरममुना सारङ्गेण वयमाकृष्टाः । अयं पुनरिदानीमपि

ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने बद्धदृष्टिः
पश्चार्धेन प्रविष्टः शरपतनभयाद् भूयसा पूर्वकायम् ।
दर्भैरर्धावलीढैः श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्मा
पश्योदग्रप्लुतत्वाद् वियति बहुतरं स्तोकमुर्व्यां प्रयाति ॥ २

(सविस्मयम्) तदेष कथमनुपतत एव मे प्रयत्नप्रेक्षणीयः संवृत्तः ?

सूतः— आयुष्मन्, उत्खातिनी भूमिरिति मया रश्मिसंयमनाद् रथस्य मन्दीकृतो वेगः । तेन मृग एष विप्रकृष्टान्तरः संवृत्तः । संप्रति समदेशवर्तिनस्ते न दुरासदो भविष्यति ।

राजा— तेन हि मुच्यन्तामभीषवः ।

सूतः— यदाज्ञापयत्यायुष्मान् । (रथवेगं निरूप्य) आयुष्मन्, पश्य पश्य ।

मुक्तेषु रश्मिषु निरायतपूर्वकाया निष्कम्पचामरशिखा निभृतोर्ध्वकर्णाः ।
आत्मोद्धतैरपि रजोभिरलङ्घनीया धावन्त्यमी मृगजवाक्षमयेव रथ्याः ॥ ३

राजा— यदालोके सूक्ष्मं व्रजति सहसा तद्विपुलतां
यदर्धे विच्छिन्नं भवति कृतसंधानमिव तत् ।
प्रकृत्या यद्वक्रं तदपि समरेखं नयनयो—
र्न मे दूरे किञ्चित् क्षणमपि न पार्श्वे रथजवात् ॥ ४

सूत, पश्यैनं व्यापाद्यमानम् । (शरसंधानं नाटयति)

(नेपथ्ये) भो भो राजन्, आश्रममृगोऽयं न हन्तव्यो न हन्तव्यः ।

सूतः— (आकर्ण्यावलोक्य च) आयुष्मन्, अस्य खलु ते बाणपथवर्तिनः कृष्णसारस्यान्तरे तपस्विन उपस्थिताः ।

राजा — ( ससंभ्रमम् ) तेन हि प्रगृह्यन्तां वाजिनः ।

सूतः — तथा ( रथं स्थापयति । ततः प्रविशत्यात्मनातृतीयो वैखानसः )।

वैखानसः — ( हस्तमुद्यम्य ) राजन्, आश्रममृगोऽयं न हन्तव्यो न हन्तव्यः ।

न खलु न खलु बाणः संनिपात्योऽयमस्मिन्
मृदुनि मृगशरीरे पुष्पराशाविवाग्निः ।
क्व बत हरिणकानां जीवितं चातिलोलं
क्व च निशितनिपाता वज्रसाराः शरास्ते ॥ ५
तत् साधुकृतसंधानं प्रतिसंहर सायकम् ।
आर्तत्राणाय वः शस्त्रं न प्रहर्तुमनागसि ॥ ६

राजा — एष प्रतिसंहृतः । ( यथोक्तं करोति )

वैखानसः — सदृशमेतत् पुरुवंशप्रदीपस्य भवतः ।

जन्म यस्य पुरोर्वंशे युक्तरूपमिदं तव ।
पुत्रमेवंगुणोपेतं चक्रवर्तिनमाप्नुहि ॥ ७

इतरौ — ( बाहू उद्यम्य ) सर्वथा चक्रवर्तिनं पुत्रमाप्नुहि ।

राजा — ( सप्रणामम् ) प्रतिगृहीतम् ।

वैखानसः — राजन्, समिदाहरणाय प्रस्थिता वयम् । एष खलु कण्वस्य कुलपतेरनुमालिनीतीरमाश्रमो दृश्यते । न चेदन्यकार्यातिपातः प्रविश्य प्रतिगृह्यतामातिथेयः सत्कारः ।

From Kālidāsa's Abhijñāna-Sakuntalam, Act 1.

## I. Vocabulary

ज्या bow-string
कृष्णसारः antelope
कार्मुकम् bow
पिनाकिन् *m.* Śiva
भङ्गः curve
स्यन्दनः chariot
भूयसा almost
दर्भः kind of grass
अद्धा truly
वाजिन् horse
निपातः fall
अतिपातः neglect

उदग्र high
वियत् *n.* sky
स्तोकम् a little
उर्वी earth
उत्खातिन् uneven
रश्मिः *m.* rein
संयमनम् drawing in
दुरासद difficult to overtake
वक्र crooked
अतिलोल very fragile
वज्रसार adamantine
आतिथेय due to guests

अभीषुः *m.* rein
निरूपय to act
निरायत stretched out
चामरः chowrie
निभृत steady
जवः speed
रथ्यः horse
सूक्ष्म small, minute
प्र-ग्रह् to check, to stop
निशित sharp
सायकः arrow
सत्कारः hospitality